कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-487

हस्तलिखित संग्रह

दाखल क्र. 487 विषय नीति:

नांव- लघुवृद्धचाणाक्य नीतिशास्त्र MSS

लेखक/लिपीकार विजुराम मीसर

पृष्ठ 30

काळ संवत 1898 पूर्ण/~~अपूर्ण~~

॥ऽथलघुवृद्धचाणाक्षनीतिशास्त्रप्रारंभः॥

चा०
१

श्रीगणेशायनमः॥ ॐ पठंतिसर्वशास्त्राणिदुर्लभाभाव
भेदना॥ शिरोवहतिपुष्पाणिगंधंजानातिनासिका॥१॥
प्रस्तावसदृशंवाक्यंस्वभावसदृशंप्रियं॥ आत्मशक्तिसमं
कोपंयोजानातिसपंडितः॥२॥ भिक्षुकोबाळकश्चैवराजा
भार्यास्तथैवच॥ अस्तिनास्तिनजानातिदेहिदेहिपुनःपु
नः॥३॥ नमंतिसफलावृक्षानमंतिकुळजानराः॥ मुष्क
काष्टाश्चमुर्खाश्चननमंतिकदाचन॥४॥ नास्तिविद्यासमो
बंधुर्नास्तिव्याधिसमोरिपुः॥ नास्त्यपत्यसमोस्नेहोना
स्तिदैवात्परंबलं॥५॥ जलबिंदुनिपातेनक्रमशःपूर्यतेघ
टः॥ सहेतुःसर्वविद्यानांधर्मस्यचधनस्यच॥६॥ काव्यशा

शिव
१

स्त्राविनोदेन काला गच्छति धीमतां ॥ व्यसनेन च मूर्खाणां नि
द्रया कलहेन वा ॥ ७ ॥ यत्राहिंसापरो धर्मः पापिष्टस्तत्र कीदृ
शः ॥ मांसाहारोहितोयत्र राक्षसस्तत्र कीदृशः ॥ ८ ॥ उद्यमं
कलहः कंडूर्द्यूतं पानं परस्त्रियः ॥ निद्रा व्यवाय आहारं से
व्यमानं च वर्द्धते ॥ ९ ॥ मूलं भुजंगैः शिखरं विहंगैः शाखा पु
वंगैः कुसुमानि भृंगैः ॥ आवेष्टितो दुष्टजनैः समस्तैः न मु
च्यते चंदन शीतलत्वं ॥ १० ॥ शतं विहाय भोक्तव्यं सहस्रं स्ना
नमाचरेत् ॥ लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत् ॥ ११ ॥
नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ॥ विक्रमार्जि
तवित्तस्य स्वयमेव मृगेंद्रता ॥ १२ ॥ दुर्जनैरुच्यमानानि

सम्मतानिप्रियाण्यपि ॥ अकालकुसुमानीवभयंसंजनयंति
च ॥ १३ ॥ विद्यामित्रंविदेशेचसुस्त्रीमित्रंगृहेतथा ॥ संग्रामेच
भुजोमित्रंअंतकालेजनार्दनः ॥ १४ ॥ यदिगोष्ठ्यांसिमूर्खोलंग्रा
मेवसतिदिनत्रयं ॥ अपूर्वस्यागमोनास्तिपूर्वाधीतंविनश्य
ति ॥ १५ ॥ क्षमातुल्यंतपोनास्तिनास्तिक्रोधसमोरिपुः ॥ अ
न्नदानात्परंदानंनसंतोषात्परंधनं ॥ १६ ॥ अभ्रछायातृणा
ग्निश्चपराधीनंचयत्सुखं ॥ अज्ञानेषुचवैराग्यंक्षिप्रमेव
विनश्यति ॥ १७ ॥ महतांस्थानमाश्रित्यफलंकर्मानुसारिच
कंठेलग्नोमहेशस्यवातंभक्ष्यतिवासुकिः ॥ १८ ॥ शर्कराघ्रा
तभारेणानिंबवृक्षमुपार्जयेत ॥ पयसासिंचितानिसंतानि

षोमधुरायते ॥१९॥ पंडितोहिवरःशत्रुनमूर्खोहितकारकः॥
वानरेणहतोराजाविप्रश्चौरेणरक्षितः॥२०॥ शुचिर्भूमिग
तंतोयंशुचिर्नारीपतिव्रता शुचिःक्षेमकरोराजासंतुष्टो
ब्राह्मणःशुचिः॥२१॥ धनेषुजीवितायेषुस्त्रीषुपुत्रान्ने
षापि अतृप्ताःमानवाःसर्वेयातायास्यंतियांतिच॥२२॥
नमातान्यपितामार्यानपुत्रान्चबांधवा यमांतिकंप्रया
तस्यसुकृतंदुष्कृतंव्रजेत्॥२३॥ आयुर्वित्तंगृहछिद्रंमंत्रमो
षधमैथुनं दानमानापमानंचनवगोप्यानिकारयेत्॥२४॥
किंमुक्ताहारोहदिमर्कटस्यमिष्टान्नपानंकिमुगर्धभस्य
अंधस्यदीपंबधिरस्यगीतंमुर्खस्यकिंधर्मकथाप्रसंगः॥२५॥

चा० १०

वरं बुद्धिर्न सा विद्या विद्याबुद्धिर्गरीयसी ॥ बुद्धिहीना विनश्यंति यथा हि सिंहकारका: २६ एकोदरसमुत्पन्ना एकनक्षत्रजातका: ॥ नेभवंति समाःशीला यथा वदरिकंटका २७ मातृवत्परदारेषु परद्रव्येषु लोष्टवत् आत्मवत् सर्वभूतेषु य: पश्यति स वैष्णव २८ क्रोधमूलं मनस्तापं क्रोधसंसारबंधनं ॥ धर्मक्षयकर: क्रोध स्तस्मात् क्रोधं परित्यजेत् २९ मनसाचिंतितं कार्यं दैवमन्यत्र चिंतयेत् ॥ राजकंन्याभिलाषेन श्रीपातो व्याघ्रभक्षित: ॥ ३० नीचाश्रयो न कर्तव्य कर्तव्यो महदाश्रय: ॥ अजा सिंहप्रसादेन अरूढा गजमस्तके ३१ गीते नादे पठे वेदे संग्रामे स

च्चिव

१०

सुराग्रहे॥ आहारेश्च व्यवहारे च अर्थलज्जां न कारयेत्॥ ३२॥ न
कुर्यात् स्वप्नशास्त्राणि सामुद्रिकचिकित्सिकाः॥ ज्योतिषागा
रुडाश्चैव कलौ भवति वानुवा॥ ३३॥ न पर्वस्नानं तपःस्नानं
स्नानमिंद्रियसंयमः॥ सर्वभूतदयास्नानं जलस्नानं तु पं
चमं॥ ३४॥ अनाहूतः समायाति अनापृष्टं तु भाषितं॥ पर
निंदात्मनिमश्चैव चत्वारि लघुलक्षणं॥ ३५॥ न पश्यति च जन्मां
धो जन्मांधो नैव पश्यति॥ न पश्यति मदोन्मत्तो अर्थी दोषा
न्न पश्यति॥ ३६॥ असंतुष्टो द्विजो नष्टः संतुष्टो पृथिवीपतिः॥
सलज्जा गणिका नष्टा निर्लज्जा च कुलांगना॥ ३७॥ याव
त्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो यावत्क्षीयते ह्या

चा०
४

युक्ताक्तुद्धर्मंसमाचरेत् ॥ ३८ ॥ सत्येप्रतिष्ठितःकालोधर्मःस
त्येप्रतिष्ठितः ॥ उदधिसत्यवाक्येनमर्यादांनापिलंघयेत् ॥ ३९ ॥
वदंतिमुनयःसर्वेनानृतात्पातकंपरं ॥ सत्यात्परतरंनास्ति
तस्मात्सत्यंवदाम्यहं ॥ ४० ॥ यैर्दृष्ट्वाकूपातितंनदुःखंचपरिक्षी
यते ॥ सविज्ञेयोमनुष्याणांसवजन्मनिवैकृतं ॥ ४१ ॥ शृंगी
तुंबीजलौकाच यथाकर्षतिशोणितम् ॥ तथाकर्षतिधर्मो
ग्रंदासीवेश्यापरास्त्रियः ॥ ४२ ॥ नस्यात्तमंगंतमंक्षणम
प्यधर्मैःसह ॥ पयोपिशौण्डिनीहस्तेमदिरांमन्यतेजन ॥ ४३ ॥
नविनापरवादेनरमतेदुर्जनोजनः ॥ काकःसर्वरसानभुं
क्तेविनामेध्यंनतृप्यति ॥ ४४ ॥ परोपिहितवानबंधुबंधुरपि शिव
४

हितःस्वयं॥ आहितोदेहजोव्याधिःहितंमरण्यमौषधम्॥४५
उद्यमेनविनाराजन्सिद्धंतित्वमनोरथः॥ नहिसुप्तस्यसिं
हस्यप्रविशंतिमुखेमृगाः॥४६॥ स्त्रीणांदोषसहस्राणि
गुणानांत्रयमुत्तमं॥ पुत्रजन्मगृहेधर्मंह्यपिपातिंनिनाशाह
४७॥ भोज्यंभोजनशक्तिश्चरतिशक्तिर्वरास्त्रियः॥ विभवो
दानशक्तिश्चनाल्पस्यतपसःफलं॥४८॥ परोक्षेकार्यहंता
रंप्रत्यक्षेप्रियवादिनं॥ वर्जयेत्तादृशंमित्रंविषकुंभंपयोमु
खं॥४९॥ मनसाचिंतितंकार्यंवाचानैवप्रकाशयेत्॥ मंत्रर
क्षेत्गूढात्माकार्यसिद्धिश्चजायते॥५०॥ खलःसर्वपमा
त्राणिपरछिद्राणिपश्यति॥ आत्मनोबिल्वमात्राणिपश्य

चा० न्नापि न पश्यति ॥५१॥ इंद्रियाणि च संयम्य रागद्वेषविवर्जितं
५ समदुःखसुखः शांतस्तत्वज्ञो साधुरुच्यते ॥५२॥ एकेनापि
कुवृक्षेण दह्यमानेन वान्हिना ॥ दह्यते तद्वनं सर्वं कुपुत्रेण
कुलं यथा ॥५३॥ एकेनापि सुवृक्षेण वासितेन सुगंधिना ॥
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥५४॥ पुस्तकं प्रत्यया
धीतं नधीतं गुरुसन्निधौ ॥ न शोभते सभामध्ये जारगर्भा
मिव स्त्रियं ॥५५॥ उपदेशो हि मूर्खाणां प्रकोपाय न शांतये ॥
पयपानं भुजंगानां केवलं विषवर्द्धते ॥५६॥ विभवः पूज्य
ते लोके न शरीराणि देहिनां ॥ चांडालोपि नरः श्रेष्ठो यस्या स्तिव
स्ति विपुलं धनं ॥५७॥ त्यज दुर्जनसंसर्गं भज साधुसमागमं ॥ ५

कुरुपुण्यमहोरात्रंस्मरानित्यंनजीवितं ॥५८॥ भाग्यंफलति
सर्वत्रनाविद्यानचपौरुषं ॥ समुद्रमथनाल्लेभेहरिर्लक्ष्मीह
रोविषं ॥५९॥ नारिकेलफलाकाराहृश्यंतेसज्जनाजना: ॥ अन्ये
चबदिराकाराबहिरेवमनोरमा ॥६०॥ यस्यनास्तिस्वयंप्र
ज्ञाशास्त्रंतस्यकरोतिकिं ॥ लोचनाभ्यांविहीनस्यसूर्यःकिं
करिष्यति ॥६१॥ दूरस्थोपिसमीपस्थोयोयस्यहृदिवर्तते
योयस्यहृदयेनास्तिसमीपस्थोपिदूरतः ॥६२॥ अनित्या
निशरीराणिविभवोनैवशाश्वतः ॥ नित्यंसन्निहितोमृ
त्युःकर्तव्योधर्मसंग्रहः ॥६३॥ शर्वरीदीपकश्चंद्रोप्रभाते
रविदीपकः ॥ त्रैलोक्यदीपकोधर्मस्सुपुत्रःकुलदीपकः ॥६४॥
हस्तीअंकुशमात्रेणकशाहस्तेनवाजिन ॥ शृंगिनोल

कुरहस्तेन देशत्यागेन दुर्जनं ॥ ६५ ॥ आग्निरापोस्त्रियोमुर्खः
सर्पोराजकुलानिच ॥ नित्यंयत्नेनसेव्यंतेसद्यः प्राणहरा
णिषट् ॥ ६६ ॥ उत्थायोत्थायपश्यंतेदरिद्राणांमनोरथा ॥ बा
लवैधव्यदग्धानांकुलस्त्रीणांकुचाइव ॥ ६७ ॥ साधुरेवार्थि
भिर्याम्यः क्षीणवित्तोपिसर्वदा ॥ सुक्कोपिहीमदीमार्गः ख
मते सलिलार्थिभिः ॥ ६८ ॥ यस्यतस्मानविख्याता दरिद्रंत
स्यवैध्रुवं ॥ यस्य तस्याचविख्याता ससुखीप्राणिनांप्रभुः ॥ ६९ ॥
सछिद्रोमध्यकुटिलः कर्णस्वर्णस्यभाजनं ॥ दिग्धैवंनिर्मल
नेत्रंपात्रंकज्जलभस्मनां ॥ ७० ॥ किंचिदाश्रयसंयोगात् ध
त्तेशोभांसमाध्यपि ॥ कांताविलोचनन्यस्तंमलीमसमिवां
जनं ॥ ७१ ॥ एकाकोपवसतेनि संपर्वतेगंधमादने ॥ किमर्थं

कांचनीकार्या किमर्थं सूकरीमुखं ॥ ७२ ॥ हस्ताम्यनेकदानानि रत्नानि विविधानि च ॥ सुवाक्यं नाहि संप्रोक्तं तेनाहं सूकरी मुखः ॥ ७३ ॥ उपदेशो न दातव्यो यादृशो तादृशे नरे ॥ पश्यवा नरमूर्खेण सुग्रहं निगृहं कृतं ॥ ७४ ॥ हस्तपादसमायुक्तो दृश्यंते पुरुषाकृति ॥ सीतेन नाविद्यते मूढ गृहं किं न रोति च ॥ ७५ ॥
इति श्री नीतिशास्त्र संपूर्णं ॥ ॥ अथ चाणाक्य प्रारंभः ॥ प्रणम्य शंकरं देवं ब्रह्माणं च जगद्गुरुं ॥ विष्णुः प्रणम्य शिरसा वक्ष्येहं शास्त्रमुत्तमं ॥ १ ॥ चाणाक्येन स्वयं प्रोक्तं नीतिशास्त्र समुच्चयं ॥ तदहं संप्रवक्ष्यामि नराणां बुद्धिवर्द्धनं ॥ २ ॥ अतो योपठते शास्त्रं कीर्तिर्लोके प्रजायते ॥ कीर्तिवान् पूज्यते लोके

चा०
७

परत्रेहचमानवा॥३॥वृद्धोपिपलितकायोपिकर्तव्यंश्रुतिसं
ग्रह॥नंतत्रधानिनोयांतियत्रयांतिबहुश्रुता॥४॥श्रुत्वाध
र्मंविधानोपिश्रुत्वात्यजतिदुर्मति॥श्रुत्वाज्ञानमवाप्नोति
श्रुत्वामोक्षांतिगछति॥५॥यछ्रुतंनविरागायनधर्मायन
शांतये॥किंतेनपठितेनापिकाकवासितमेवतत्॥६॥खं
डखंडेषुपांडित्यंकरकूत्यंचमैथुनं॥भोजनंचपराधीनं
तिस्रःपुंसांविडंबना॥७॥पदंपदार्द्धंपादंवाआहारेषुसु
भाषितं॥मूर्खोपिप्राज्ञतांयातिनदीभिःसागरोयथा॥८॥
पक्षीणांबलमाकाशंबालानांपायसंबलं॥बलंमूर्खस्यत्ताव
मौनत्वंतस्करस्यानृतंबलं॥९॥दुर्बलस्यबलंराजामतस्या ७

नामुदकंबलं॥नराणांचबलंधर्मनारीएणांचपातिव्रता॥११॥नही
तीरेषुयेवृक्षायाचनारीनिरंकुसी॥मंत्रिहीनभवेद्राजातस्य
राज्यविनश्यति॥११॥सेवितव्योमहावृक्षछायाफलसमन्वित:॥
यदिदैवात्फलंनास्तिछायाकेनानिवारिता॥१२॥गुरुछाया
पिताछायामेंअनुछायातथैवच॥छायाराजास्तुसन्मानए
वंछायांजगौनरा॥१३॥इतिश्रीलघुचाणाक्येराजनीति
शास्त्रेप्रथमोध्याय॥१॥अतिदानाद्बलिर्बद्धोनष्टोमान
दुर्योधन:॥विनष्टोरावणोलौल्यात्अतिसर्वत्रवर्जयेत॥१
अतिरूपात्हृतासीताअतिगर्वेणरावणो॥अतिमहाबली
रामोलंकायेनचक्षयंकृतं॥२॥अतिमनामुखदोषेणबध्यंते
शुकसारिका॥बकास्तत्रनबध्यंतेमौनंसर्वार्थसाधकं॥३

चा०
८
क्षमाधनुर्गृहीतस्य दुर्जनः किं करिष्यति ॥ अतृणे पतितो व
न्हिः स्वयमेवोपशाम्यति ॥ ४ ॥ धर्मस्य मूलं राजानस्तपोमूलं च
ब्राह्मणा ॥ ब्राह्मणा यत्र पूज्यंते तत्र धर्मः सनातनः ॥ ५ ॥ राज्ञ
धर्मिणि धर्मिष्ठ पापे पापे समे समा ॥ लोकास्तदनुवर्तंते य
था राजा स्तथा प्रजा ॥ ६ ॥ बुद्धिबोधानि शास्त्राणि नाबुधाः श
स्त्रबोधकः प्रत्यक्षे चूक्षते दीपे चक्षुर्हीनो न पश्यति ॥ ७ ॥ पठ
कः पाठकश्चैव ये चान्ये शास्त्रचिंतका ॥ सर्वे व्यसनिनो मूर्खा
यः क्रियावान् स पंडिता ॥ ८ ॥ परोपदेशे कुशला दृश्यंते ब
हवो नरा ॥ स्वभावमनुवर्तंते सहस्रेष्वपि दुर्लभा ॥ ९ ॥ हतं ज्ञा
नं क्रियाहीनं हतमज्ञानितो नरा ॥ हतं चानायकं सैन्यं भ शिव
र्ता रहता स्त्रियः ॥ १० ॥ केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्र ८

मोहनः॥ केचित्स्नानविलोपेन केचिन्नष्टास्तु नाशिका ११॥
इति लघुचाणक्ये नीतिशास्त्रे द्वितीयोध्यायः॥ २॥ अस्म
थावेदशास्त्राणि स्नानं पांडित्यमन्यथा॥ अन्यथा तत्पुदंशां
तं लोकाः क्लिश्यंति चान्यथा॥ १॥ अग्निहोत्रफला वेदाः शील
वृत्तफलं श्रुतं॥ रतिपुत्रफला दारा दत्तभुक्तफलं धनं॥ २॥ अ
ग्निहोत्रं बिना वेदा बिना दानं क्रियाफलं॥ न भावेन विना
सिद्धिस्तस्माद्भावो हि कारणं॥ ३॥ अग्निहोत्रेषु विप्राणां
हृदि देवो मनीषिणां॥ प्रतिमा स्वल्पबुद्धीनां सर्वत्र विजि
तात्मनां॥ ४॥ धातुपाषाणदारूणां कुलाभावं निवेशयेत्॥
श्रद्धा भक्तिस्तथाभ्यासस्तस्य देवो प्रसीदति॥ ५॥ न देवो

चा० १

विद्यतेकाष्टेनपाषाणेनमृन्मये॥भावेषुविद्यतेदेवस्तस्मा
द्भावोहिकारणं॥६॥क्षांतितुल्यंतपोनास्तिनसंतोषात्परं
सुखं॥नचतृष्णात्परोव्याधिर्नचधर्मोदयापरः॥७॥क्रोधो
वैवस्वतोराजातृष्णावैतरणीनदी॥विद्याकामदुघाधेनुः
संतोषोनंदनंवनं॥८॥कोतिभारःसमर्थानांकिंदूरंव्यव
सायिनां॥कोविदेशःसुविद्यानांकःपरःप्रियवादिनां॥९॥
गुणंपृछसिमारूपंशीलंपृछसिमाकुलं॥सिद्धिंपृछसि
माविद्यांभोगंपृछसिमाधनं॥१०॥गुणंभूषायतेरूपंशी
लंभूषायतेकुलं॥सिद्धिर्भूषायतेविद्यांभोगंभूषायते
धनं॥११॥अगुणस्यहतंरूपंदुःशीलस्यहतंकुलं॥असि

शिव १

द्रुस्यहताविद्याअभोगस्यहतंधनं ॥१२॥ इतिलघुचा०त्रति
योध्याय ॥३॥ शुचिर्भूमिगतंतोयंशुचिर्नारीपतिव्रता ॥
शुचिःक्षेमकरोराजासंतोषीब्राह्मणःशुचिः ॥१॥ शुचि
र्भूमिगतंतोयंयत्रलेपोनविद्यते ॥ लेपस्थानंपरित्याज्य
अन्यस्थानंसदाशुचिः ॥२॥ असंतुष्टाद्विजानष्टासंतुष्टा
महीपालका ॥ सलज्जागणिकानष्टानिर्लज्जाश्चकुलांग
ना ॥३॥ दृष्टंविप्रसमाकीर्णंदृष्टोराजासुधार्मिकः ॥ दृष्टा
पतिव्रतानारीस्थूलंतृणमयंदृढ ॥४॥ पूर्वान्हेचक्षुर्बिंप
श्येत्मध्यान्हेतुग्रहेसदा ॥ अपरान्हेधनंपश्येत्पुत्रंप
श्येत्तुनिःससाः ॥५॥ मातामहोसनेयोज्ञागरेकार्येषुवैसुता ॥

चा०
१०

भार्यासुधर्मकालेषु नित्यमेवावलोकयेत ॥ ६ ॥ ऐश्वर्येषु वासवि
स्तीर्णेव्यसनेवापिदारुणे ॥ रणेचपुरुषोवद्धः कृतांतोनोप
नीयमः ॥ ७ ॥ नाधिपत्यंसदादेयंभागिनियस्यमातुचित ॥
कालेनसोपिदंवातिरिपुस्थानेमहारिपुः ॥ ८ ॥ यस्यनज्ञाय
तेशीलंकुलंविद्यानरस्यच ॥ कस्तेनसहविस्वासंपुमानिछे
द्विचक्षणा ॥ ९ ॥ इतिलघुचा० चतुर्थोध्याय ॥ ४ ॥ कावेप्रीति
स्वमांजारैः काप्रीतिरवनीपातिः ॥ गणिकाभग्नका प्रीतिः
काप्रीतिर्भिक्षुकैः सह ॥ १ ॥ यथावृष्टिसमुद्रेषु भुक्तस्योपरि
भोजनं ॥ एवंप्रीतिखलस्यार्थेउत्पन्नार्थविसीदति ॥ २ ॥ पु
स्तकेषुयथाविद्यापरहस्तेषुयद्धनं ॥ उत्पन्नेषुचकार्येषु

शिव
१०

नसाविघातनतद्धनं ॥३॥ हीयतेस्वच्छहृदयैः पिंडैयेनैवपाणि
ना ॥ मार्ज्जारएववृत्तस्तु तमेवनाहिंसीदति ॥४॥ मागापिशुन
विश्वासंममायंपूर्वमिाश्रितः ॥ चिरकालेनजीर्णोपिदहत्ये
वभुजंगमः ॥५॥ मुषित्वापरिचितानिस्वन्वंग्याः पातितोस्त
नौ ॥ परोपिनापियोमोपिसकथंभार्य्यमश्नुतं ॥६॥ द्विजद्व
ढेगक्रूरंक्रूरमेकांतदारुणं ॥ खलस्याहेश्चवदनं नोपकाराय
केवलं ॥७॥ परिक्षेपतिदोषेणवर्त्तमानः स्वयंयथा ॥ खलस्य
सहजोदोषः प्रकाशयातिवान्यथा ॥८॥ खलः सर्षपमात्रा
णिपरछिद्राणिपश्यति ॥ आत्मनोबिल्वमात्राणिपश्यन्न
पिनपश्यति ॥९॥ इतिलघुचा० पंचमोध्याय ॥५॥ सिंदूर

चा०
११

पेण राजानो व्याघ्ररूपेण मंत्रिणः॥ भक्ष्यांश्च गृध्ररूपेणाक्ष
यं यास्यंति वै प्रजाः॥ १ ॥ ब्रह्मस्वेनच पुष्टांगा हस्त्यश्वरथपा
तयः॥ संग्रामकाले सीदंति राजा ब्राह्मण भक्षणात्॥ २ ॥ अ
न्यायोपार्जितं वित्तं दशवर्षाणि तिष्ठति॥ प्राप्ते षोडशमे
वर्षे समूलं च विनश्यति॥ ३ ॥ वस्त्रपादपरित्राणे बहुक्षीरा
श्च धेनवः॥ औषधं वीर्य्यमाहारं यथालभ्यं तथा क्रियेत्॥ ४
एकविद्याप्रधानोपि बहुज्ञानी भवेन्नरः॥ सुभाषितानि
वक्ष्यामि यानि शास्त्रोद्धृतानि च॥ ५ ॥ सुभाषितानां ग्रंथा
नां संचयं न करोति च॥ स वै प्रस्तावयज्ञेषु किं प्रदास्यति दा
रुणः॥ ६ ॥ राहुरश्चक्रतविद्धांश्च रूपबलसस्यपार्थिवः॥ यत्र

शिव
११

यत्र गमिष्यंति तत्र तत्र कृताळया ॥ ७ ॥ विद्वत्वंच नृपत्वंच नैवतु
ल्यं कदाचन ॥ स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ८
रूपवानपि मूर्खोपि गत्वाच विपुलां सभां ॥ रक्षणीया स्वकी
जीव्हा भार्यादुश्चारणी यथा ॥ ९ ॥ इति लघुचा० पंचमोध्या
य ॥ ५ ॥ किं कुळेन विशालेन विद्याहीनेन देहिनां ॥ अकुली
नोपि विद्वान्स देवैरपि स पूज्यते ॥ १ ॥ गुणा कुर्वंति दूतत्वं
दूरेपि वसतां सतां ॥ केतकी गंधमाघ्राय स्वयं गच्छंति षट्
पदा ॥ २ ॥ एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ॥ कुलं
पुरुषसिंहेन चंद्रेणेव प्रकाश्यते ॥ ३ ॥ कोकिलानां स्वरो
रूपं नारिरूपं पतिव्रता ॥ विद्यारूपं कुरूपाणां क्षमारूपं तपस्विनां ॥ ४ ॥

गुणेषु क्रीयते यत्र किमाटोपैः प्रयोजनं ॥ विक्रियं ते न घंटाभिः
गावः क्षीरविवर्जिता ॥ ५ ॥ गुणाः सर्वत्र पूज्यंते पितृवंशो निर
र्थकः ॥ वासुदेवं नमस्यंति वसुदेवं न ते जनाः ॥ ६ ॥ सुखार्थी सं
त्यजेद्विद्यां विद्यार्थी संत्यजेत्सुखं ॥ सुखिनस्तु कुतो विद्या कुतो
विद्यार्थिनां सुखं ॥ ७ ॥ नात्युच्चैः शिखिरं वायोर्नातिनीचं रसा
तलं ॥ व्यवसाय द्विजातीनां नातिपारं महोदधे ॥ ८ ॥ पुस्तकं प्र
त्ययाधीतं नाधीतं गुरुसन्निधौ ॥ न शोभते सभामध्ये जार
गर्भ इव स्त्रियः ॥ ९ ॥ मांसभक्षैः सुरापानैर्मूर्खैश्चाक्षरवर्जि
तैः ॥ पशुभिः पुरुषाकारैः भाराक्रांतेव मेदिनी ॥ १० ॥ एकम
प्यक्षरं यस्तु गुरोः शिष्यस्तु वेदयेत् ॥ पृथिव्यां नास्ति तत् द्रव्यं

यदत्वा अनृणी भवेत् ॥ ११ ॥ एकाक्षरं प्रदातारं यो गुरुं नैव मन्य
ते ॥ शुनां योनिशतं गत्वा चांडालेषु प्रजायते ॥ १२ ॥ इति लघुचा०
सप्तमोध्याय ॥ ७ ॥ धनवान कुलीनोपि कुलीनो धनवर्जितः ॥
रूपवानजातिवांसोपि निर्धन परिभूयते ॥ १ ॥ धनहीनो नहो
नस्तु धनकिंकस्यानिश्चलं ॥ विद्याज्ञानविहीनस्तु सहीनः स
र्ववस्तुषु ॥ २ ॥ वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धास्तथैव च ॥ सर्वे
ते धनवृद्धस्य द्वारे तिष्टंति किंकराः ॥ ३ ॥ वरं हरणिमद्भूतं च
रताकामनतरुणां ॥ भूटहीनाक्षरं प्रोक्तं देहीति कृपणं वचं ॥ ४
सुखस्य दुःखस्य न कोपि दाता परो ददातीति कुबुद्धिरेषा ॥
अहंकरोमीति वृथाभिमान स्वकर्म सूत्र ग्रथितो हि लोकः ॥ ५ ॥

चा॰ १२ विद्यायाभाजनंकेचित्केचिदर्थस्यभाजनं॥ उभयोभाजने
केचित्केचिन्नोभयभाजनं॥६॥ पंचैतामपिसृज्यंतेगर्भस्थैसै
वदेहिनः॥ आयुकर्मच्चवित्तंचविद्यानिधनमेवच॥७॥ लिखि
ताचित्रगुप्तेनललाटेक्षरमालिका॥ यथाभवतितत्सर्वंअ
न्यथानभाविष्यति॥८॥ भवितव्यंयथायेननतद्भवतिचान्य
था॥ अन्यथाचभवेत्तस्यमनवाक्कायकर्मणः॥९॥ प्राप्तम
मर्थंलभतेमनुष्योकिंकारणंदैवमलंघनीयं॥ तस्मान्नशो
चामिनविस्मयामियदस्मदीयंनहितत्परेषां॥१०॥ वने
रणेशत्रुजलाग्निमध्येमहार्णवेपर्वतमस्तकेवा॥ सुप्तंप्र
मत्तंविषमास्थितंवारक्षंतिपुण्यानिपुराकृतानि॥११॥ चाव
इतिलघुचाणाक्येराजनीतिशास्त्रेअष्टमोध्यायः॥८॥ ९९९ १२

॥अथवृद्धचाणाक्यप्रारंभ॥ प्रणम्यशिरसाविष्णुंत्रैलोक्याधि
पतिंप्रभुं॥नानाशास्त्रोद्धृतंवक्ष्येराजनीतिसमुच्चयं॥१॥ध
र्मोपदेशविनयंकार्याकार्यंशुभाशुभं॥अधीतेवेतथाशा
स्त्रेनराज्ञास्यांतितत्वतः॥२॥तदहंचप्रवक्ष्यामिनराणांबु
द्धिवर्द्धनं॥येनविज्ञानमात्रेणसर्वज्ञत्वंप्रजायते॥३॥कुमि
त्रंचकुभार्यांचाकुराजानंकुमंत्रिणं॥कुपुत्रंचकुदेशंचदूर
तःपरिवर्जयेत्॥४॥कुमित्रेसौहृदंनास्तिकुभार्यायांकु
तारतिः॥कुराजानिभयंनित्यंकुपुत्रेसर्वतोसुखं॥५॥कुमि
त्रेणभयंनित्यंकुदेशेनचजीवते॥कुतःपिंडकुपुत्रेणना
स्तिसौख्यंकुराजनि॥६॥मुर्खशिष्योपदेशेनदुष्टस्त्रीम

रणेनच विषातांसंप्रयोगेण पंडितोपिवसीदति ॥ ७ ॥ दुष्टा
भार्यासठंमित्रंभृत्यश्चोत्तरदायक: ससर्पेचगृहेवासोमृ
त्युरेवनसंशय: ॥ ८ ॥ यस्यक्षेत्रंनदीतीरेभार्याचैवपरेरता ॥
ससर्पेचगृहेवासोमृत्युरेवनसंशय: ॥ ९ ॥ आपदर्थेधनंर
क्षेद्दारांरक्षेद्धनैरपि ॥ ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवीं
त्यजेत् ॥ १० ॥ यस्मिन्देशेनसन्मानंनवृत्तिर्नचबांधवा ॥ नच
विद्यागम:कश्चिद्वस:स्तत्रनकारयेत् ॥ ११ ॥ चलत्येकेनपा
देनतिष्ठत्येकेनपंडिता ॥ नासमीक्ष्यपरंस्थानंपूर्वमायत
नंत्यजेत् ॥ १२ ॥ तत्रपुत्रनवस्तव्यंयत्रनास्तिचतुष्टयं ॥ ऋण
प्रदातावैद्यश्चश्रोत्रियोसजलानदी ॥ १३ ॥ त्यजेत्स्वामिन

मस्युग्रं अस्युग्रात्कृपणं त्यजेत ॥ कृपणाच्च विशेषज्ञं तस्माच्च
कृतघ्नं त्यजेत ॥ १४ ॥ त्यजेदवृत्तिकं देशं वृत्तिसोपद्रवां त्यजेत ॥
कृपणं च कृतघ्नं च विशेषात्परिवर्ज्जयेत ॥ १५ ॥ त्यजंति पुत्रा
णि धनैर्विहीनं पुत्राश्च दारास्सुहृदज्जनाश्च ॥ तमाप्यर्यंतं पु
नराश्रयंति अर्थो हि लोके पुरुषस्य बंधु ॥ १६ ॥ पंचयत्र न वि
द्यंते न तत्र दिवसं वसेत ॥ लोकयात्रा भयं लज्जा दाक्षिण्यं ध
र्मशीलता ॥ १७ ॥ पंचयत्र न विद्यंते न कुर्यात्तत्र संगतिं ॥ प्रयो
गिश्रोत्रियो राजन् द्यवैद्यश्च पंचमः ॥ १८ ॥ ज्ञातव्याप्रेक्षणे
भृत्याः बांधवा व्यसनागमे ॥ मित्राचापत्कालेषु वै भा
र्यां च विभवक्षये ॥ १९ ॥ आतुरे व्यसने प्राप्ते दुर्भिक्षे राजविग्रहे ॥

चा० राजद्वारेस्मशानेतत्रातिष्टंतिबाधवा:॥२०॥इतिवृद्धचाण
१५ क्यप्रथमोध्याय:॥१॥अनृतंसाहसंमायामूर्खत्वमविवेकता
अशौचमघृणत्वंचस्त्रीणांदोषास्वभावजा॥१॥यध्रुवाणि
परित्यज्यअध्रुवानपरिसेवते॥ध्रुवाणितत्रनश्यंतिअध्रु
वंचनमेवहि॥२॥नदीपातयतेकूलंनारीपातयतेकुलं॥ना
रीणांचनदीनांचाविश्वासंनैवकारयेत॥३॥धर्मार्थकाम
मोक्षेषुयस्यैकोपिनविद्यते॥जन्मजन्मनिवेदु:खंमरणंत
स्यकेवलं॥४॥वरयेत्कुलजांप्राज्ञोविरूपामपिकन्यकां॥
रूपान्वितांचनीचापिविवाह:सदृशेकुले॥५॥विषादप्या शिव
मृतंग्राह्यंअमेध्यादपिकांचनं॥नीचादप्युत्तमांविद्यांस्त्री १५

रत्नंदुष्कुलादपि॥६॥ स्त्रीणांद्विगुणमाहारोबुद्धिस्तस्याश्चतु
र्गुणाः॥ षड्गुणोव्यवसायश्चरतिश्चाष्टगुणास्मृताः॥७॥
भोज्यंभोजनशक्तिश्चरतिशक्तिर्वरास्त्रियः॥ विभवोदानश
क्तिश्चनाल्पस्यतपसःफलं॥८॥ यस्यपुत्रोवशीभूतोभार्या
छंदानुगामिनी॥ विभवेपिसुसंतोषस्वर्गस्तस्यइहैवहि॥९॥
तेपुत्रायेपितुर्भक्ताःसपितायस्तुपोषकः॥ तन्मित्रंयत्रवि
श्वासंभार्याचप्रियवादिनी॥१०॥ परोक्षेकार्यहंतारंप्रत्य
क्षप्रियवादिनं॥ वर्जयेत्तादृशंमित्रंविषकुंभपयोमुखं॥११॥
नविश्वासंकुमित्रस्यमित्रंचापिनविश्वसेत्॥ कदाचित्कु
पितेमित्रंसर्वंगुह्यंप्रकाशयेत्॥१२॥ नदीनांचनखीनांच

चा०
१६

शृंगिणांशस्त्रपाणिनां ॥ विश्वासोनैवकर्तव्यः स्त्रीषुराज
कुलेषुच ॥१३॥ मनसाचिंतितंकार्यंदैवंवानैवप्रकाशयेत् ॥
मंत्ररक्षेतिगूढात्माकार्यसिद्धिश्चजायते ॥१४॥ सर्पःक्रूरः
खलःक्रूरःसर्पात्क्रूरतरःखलः ॥ मंत्रेणशाम्यतेसर्पःखल
केनोपशाम्यति ॥१५॥ कष्टंचखलुमुर्षत्वंकाष्टात्कष्टंविदेश
गमनं ॥ कष्टादपिकष्टतरंपरगृहनिवासंपरान्नंच ॥१६॥ इ
तिवृद्धचा० द्वितीयोध्याय ॥२॥ लाडयेत्पंचवर्षाणिदशव
र्षाणिताडयेत् ॥ प्राप्तेषोडशेवर्षेषुपुत्रंमित्रवदाचरेत् ॥१॥
चालिताहिनमर्यादांमुंचतिभुविसाधवः ॥ सागराभिन्न
मर्यादांस्खलंतिहिसाधवः ॥२॥ एतदर्थंकुलीनानांनृकु

शिव
१६

वंतिसंग्रहं ॥ आदिमध्यावसानेषुनतेयास्यंतिविक्रिहं ॥ ३ ॥
शैलेशैलेनमाणिक्यंमौक्तिकंनगजेगजे ॥ साधवोनहिसर्व
त्रचंदनंनवनेवने ॥ ४ ॥ देशेदेशेकलत्राणिदेशेदेशेचबांधवाः
तंदेशंनैवपश्यामियत्रभ्रातासहोदरः ॥ ५ ॥ मुर्खस्तुपरिह
र्तव्यंप्रत्यक्षाद्विपदःपशु ॥ बाध्यतेवाक्यशल्येनसुदृसंकंठ
कोयथा ॥ ६ ॥ पुत्रास्तुविभवैवाक्यंनियोज्याशततंबुधैः ॥ नी
तज्ञेषुहिसंपन्नाभवंतिभुविपूज्यता ॥ ७ ॥ माताशत्रुर्पिता
शत्रुःबालोयेननपाठिकाः ॥ शोभतेसभामध्येहंसमध्ये
यथाबकः ॥ ८ ॥ श्लोकेनचतदर्द्धेनपादेनैकाक्षरेणच ॥ अ
वंध्यंदिवसंकार्यंदाताध्ययनकर्मभिः ॥ ९ ॥ लाडनाद्बह

वोदोषास्ताडनाद्बहवोगुणाः॥ तस्मात्पुत्रंचशिष्यंचताडयेन्न
चलाडयेत्॥१०॥एकेनापिसुवृक्षेणपुष्पेणचसुगंधिना॥
आमोदितंवनंसर्वंसुपुत्रेणकुलंयथा॥११॥एकेनवंशवृक्षे
नदह्यमानेनवान्हिनः॥ज्वालितंदहनंसर्वंकुपुत्रेणकुलं
तथा॥१२॥नसुखंचनलुब्धस्यनधर्मोदुष्टवेषसः॥नचा
र्थोभाग्यहीनस्यऔषधंनगतायुषः॥१३॥उपसर्गोपवक्रे
चदुर्भिक्षेचभयावहे॥असाधुजनसंपर्केयःपाडतिसजी
वति॥१४॥परान्नपरवस्त्रंचपरशय्यापरस्त्रियः॥परवेश्म
नीवासस्यदूरतःपरिवर्जयेत्॥१५॥गुरवोयत्रपूज्यंतेय
त्रधान्यंसुचिंतितं॥सहतेःकलहोयत्रतत्रसंकथ्यतेरमा॥१६॥

नहिसंसर्गदोषेण साधवोयांतिविक्रियां ॥ भुजंगेविद्यमानेपिचंदनंनविषायते ॥ १७ ॥ शीलंसत्संगुणाभ्यासंपंडितंमित्रसंग्रहं ॥ अचौरहरणीयानिपंचवानित्यधनानिच ॥ १८ ॥ इति वृद्धचा० तृतीयोध्याय ॥ ३ ॥ कःप्रभोकानिमित्राणिकोदेशः किंममस्यच ॥ कस्याहंकाचमेशक्ति चिंतयामिमुहुर्मुहु ॥ १ ॥ टिकेगुणितेशास्त्रेतथासर्वकलेषुच ॥ धर्मार्थकाममोक्षेषुसर्वत्रकुशलोवदेत ॥ २ ॥ शोकोनाशयतेप्रज्ञांशोकोनाशयतेश्रुतं ॥ शोकोनाशयतेधर्मनास्तिशोकसमोरिपुः ॥ ३ ॥ निद्रातातकुतस्तेषांयेपारण्एः व्याधिपीडिताः ॥ अवधेयकलित्राणांयेचामेकृतवैरिणः ॥ ४ ॥ यद्यपिभवतीरूपो

हीनोभस्मांगोवस्त्रहीनश्च॥ तद्यपिसभामध्येशोभवतीवि
द्याधिकपुरुषः॥५॥ हंसोनभातिबालिभोजकवृंदमध्येगोमा
यमंडलगतोनविभातिसिंह॥ जासानिभातितुरगःखरयू
थमध्येविद्यानिभातिपुरुषेषुनिरक्षरेषु॥६॥ दुर्जयोद्धिद्दलं
शरूलीकुष्टीनांसंघतंज्वरी॥ नवान्नश्चाप्यतीसारंचक्षुरोगे
चमैथुनं॥७॥ व्यायामकः फनाशायवातनाशायमर्दनं॥ स्ना
नंवैपित्तनाशायज्वरनाशायलंघनं॥८॥ जनेतान्योपनेता
धयस्तुविद्याप्रयच्छति॥ अन्नदाताभयत्रातापंचैतेपित
रस्मृताः॥९॥ यथाचतुर्भिःकनकंपरिक्षितेनिघर्षणः॥ छे
दनतापताडनैः॥ तथाचतुर्भिःपुरुषःपरिक्षितेनशीलेने
कर्मणां॥१०॥ अग्निदाहान्नमेदुःखंनचताडनछेदनैः॥

एतदेवमहादुःखंगुजाभिसहतोलनैः॥११॥गुरुरग्निर्द्विजा
तीनांवर्णानांब्राह्मणोगुरुः॥पतिरेवगुरुस्त्रीणांसर्वस्याभ्या
गतोगुरुः॥१२॥उत्तमस्यापिवर्णस्यनीचोपियद्गृहमागता॥बा
लोवाप्ययदिवावृद्धःसर्वस्याभ्यागतोगुरुः॥१३॥चौरोवाप्यथ
चांडालःशत्रुर्वापितृघातकः॥आगतोवैश्वदेवांतेसोतिथि
स्वर्गसंक्रमः॥१४॥पार्थिवस्यतुवक्ष्यामिभृत्यानांचैवलक्ष
णं॥धनसंवर्द्धतेराज्यंकोशागारस्तथाभवेत्॥वेदवेदांगतत्व
ज्ञोजपहोमपरायणः॥आशीर्वादपरोनित्यंएषराजपुरो
हितः॥१६॥प्रवीणःकुशलोदक्षःपरपक्षोपलक्षकः॥धरी
यथोक्तवादीचएषःदूतोविधीयते॥१७॥पितरपितामहोर
क्षःशास्त्रज्ञोमिष्टवाचकः॥शौचमुक्तोथभक्तश्चसूप

चा० कारः समुच्यते ॥१८॥ यजुर्वेदकृताभ्याससर्वत्रप्रियदर्शनः ॥
१९ गुणैः युक्तश्चतत्वज्ञो अध्वर्युश्चोविधीयते ॥१९॥ इतिवृद्धचा
चतुर्थोध्याय ॥४॥ आकृष्टयाद्विजैर्भुक्तं परिक्षीणाश्चबांध
वैः ॥ गोभिश्चनरशार्दूलवाजपेयफलंभवेत ॥१॥ मेधावीवा
ग्वतिप्राज्ञः सर्वशास्त्रविशारदः ॥ सर्वत्रकृतमेलापिपूर्वः
चैलस्तकोध्रुवः ॥२॥ संगातिः श्रेयसीपुंसांसुपक्षेष्वविप
क्षके ॥ केनुधेरपरिभ्रष्टाः नप्ररोहंतितंदुलाः ॥३॥ वरंनरा
ज्यंनकुराजराज्यंवरंनमित्रंनकुमित्रमित्रं ॥ वरंनदारानजन
कुदारदारा वरंनशिष्यानकुशिष्यशिष्यो ॥४॥ कुराज्यरा
ज्येनकुतः प्रजासुखं कुमित्रमित्रेणकुतश्चनिर्वृतिं ॥ कु शिव
१९

शरशतेरेणकुतोगृहेरति कुशिष्यमध्यापयतोयशः ॥५॥ सिं
हादेकं बकादेकं सिंक्षेच्चत्वारि कुर्कटात ॥ वायसात्पंच शिक्षे
त षट्स्वनस्त्रीणि गर्दभात ॥६॥ प्रभूतकाममल्पंवायोनरः
कर्तमिच्छति ॥ नसरेणततः कुर्यात ॥ सिंहस्यैकपदंयथा ॥७॥
इंद्रियाणि तु संयम्य बाकवत्पंडितं नरः ॥ देशकालप्रयोगे
न सर्वकार्याणि साधयेत ॥८॥ प्रागुत्थानंच युद्धंच संविभा
गंच बंधुषु ॥ स्त्रियमाक्रम्य भुंजीत शिक्षेच्चत्वारि कुर्कटात ॥९॥
गूढमैथुनधार्मंच काले चालयसंग्रहः ॥ अप्रमत्तमावि
श्वासं पंच शिक्षेच्च वायसात ॥१०॥ बहुशी स्वल्पसंतुष्ट
न्निद्रो लघुचेतसः ॥ स्वामिभक्तश्च शूरश्च षडेते स्वानतो गुणात ॥११॥

चा० २० सुखतोप्यारं च शीतोष्णं न च विंदति॥ संतुष्टश्च भवेन्नित्यं त्री
णि शिक्षेत रासभात्॥१२॥ एतानि विंशत्यघानि मश्चरिष्यंति मा
नवः॥ ते जयंति रिपून् सर्वान् अजेयाश्च भवंति ते॥१३॥ अर्थ
नाशं मनस्तापं गृहे दुश्चरितानि च॥ मानं चैवापमानं च म
तिमान्न प्रकाशयेत्॥१४॥ इति वृद्धचा० पंचमोध्यायः॥ द्वौ वि
प्रौ द्वौ चाग्नी च दंपत्योर्नृपभृत्ययोः॥ अंतरालेन गंतव्यं हल
स्य वृषभस्य च॥१॥ हस्ती हस्तसहस्रेण शतहस्तेन वाजिनां
शृंगिणो दशहस्तेन खड्गहस्तेन दुर्जनं॥२॥ धनधान्यप्रयो
गेषु विद्यासंग्रहणेषु च॥ आहारे व्यवहारेषु त्यक्तलज्जः
सुखी भवेत्॥३॥ सिद्धमंत्रौषधं धर्मं गृहछिद्रं च मैथुनं॥ शिव २०

कुभुक्तंकुश्रुतंमर्ममतिमान्नप्रकाशयेत् ॥ ४ ॥ संतुष्टस्यानिरी
हस्ययत्सुखंस्याणांतिचेतसः ॥ कुतस्तद्धनलुब्धस्यद्रुतस्यतत
श्चधावतः ॥ ५ ॥ यत्रोदकंतत्रपतंतिहंसाः तथैवशुष्कंपरि
वर्जयंति ॥ पूर्णंसरस्तेचसमाश्रयंतिहंसस्यतुल्यंसुखस्य
भाग्यं ॥ ६ ॥ नासंतंशालैर्भाव्यं - - - - - - - - - ॥ राजा
स्तत्रछिद्यंतेकुब्जास्तिष्टंतिपादपा ॥ ७ ॥ नासंतस्मदुनाभा
व्यंमृदुःसर्वत्रबध्यते ॥ आसारकंदलीहृष्ट्वाछेतुकोपिन
शक्यति ॥ ८ ॥ उपार्जितानांवित्तानांसागएवंहिकारणं ॥
तडागोदरसंस्थानांपरिवाहइवांभसां ॥ ९ ॥ यस्यार्थास्त
स्यमित्राणियस्यार्थास्तस्यबांधवाः ॥ यस्यार्थःसपुमान्

चा० लोकेयस्यार्थःसचजीवति॥१०॥अर्थाशनाविहीनश्चापरसस्या
२१ ल्पमेधसः॥उछिद्यंतेक्रियासर्वाग्रीष्मेकुशरितोयथा॥११॥
अर्थासर्वत्रपूज्यंतेनशरीराणिदेहिनां॥चांडालोपिनरश्रे
ष्टोयस्यास्तिविपुलंधनं॥१२॥इतिवृद्धचा० षष्टमोध्याय॥६॥
जितंवृत्तंचदारिद्रगोभिरभ्यागतोजितः॥जिताधनवता
दारावल्लशास्त्रेसमार्जितः॥१॥वाल्मीकंमधुनाकंचशुक्ल
पक्षेतुचंद्रमाः॥राजद्रव्यंचमोक्षंचस्तोकेस्तोकेचवर्द्धते॥२॥
शनैरर्थंशनैर्विद्याशनैःपर्वतमारुहेत॥शनैःकामंच
मोक्षंचपुंचैःतानिशनैःशनैः॥३॥इदमेवहीपांडित्यंये
नार्थोवर्द्धतेसदा॥अयमेवहिपरोधर्मोनित्यंसमर्मसमाश्रयेत॥४॥

त्यजदुर्जनसंसर्गंभजसाधसमागमं॥कुरुपुण्यमहोरात्रं
स्मरनित्यमनित्यतां॥५॥जटरश्चतपस्वीचशूरश्चापिढु
तव्रूत:॥मद्यपस्त्रीसतीराजन्नतप्यांतिकराचिन:॥६॥
स्त्रीविनश्यतिगर्वेनतप:क्रोधेनविनश्यति॥गावोदूरप्र
चारेणमानवोलोभछिष्यया॥७॥यस्यभार्याशुचिर्दक्षा
भर्तारमनुगामिनी॥नित्यंमधुरभाषाचसस्त्रीवैहरतेम
नु॥८॥यस्यभार्याविरूपाक्षीकश्मलाकलहप्रिया॥उत्त
रोत्तरवादीचसुखंतस्यनाविद्यते॥९॥पुत्रिणीचपतिप्रा
णासफलंतस्यजीवनं॥१०॥सद्भावेनहितुष्यंतिदेवा:सत्पु
रुषागता:॥अन्नैश्चैवार्थदानेनवाक्प्रदानेनपंडिता:॥११॥

चा०
२२

इतिवृद्धचा० सप्तमोध्याय॥ ७॥ उत्तमंप्रणिपातेनशूरंभेदेन योजयेत॥ नीचमल्पप्रदानेनसमंशक्त्यापराक्रमं॥ १॥ नाग्निस्तृप्यतिकाष्ठेमनदीभिर्नमहोदधिः॥ नातकः सर्वभूतेभ्यनपुंभिर्वामलोचना॥ २॥ महतांप्रार्थिनायोगे विपत्तिरपिश्लाघ्यते॥ दंतहीनोपिहिनागानांम्लाघ्योगिरिविदारणे॥ ३॥ अपुत्रस्यगतिनास्तिस्वर्गोनैवचनैवच॥ तस्मात्पुत्रमुखंदृष्ट्वास्वर्गंगच्छंतिमानवाः॥ ४॥ अपुत्रस्यगृहंशून्यंदिशःशून्याअबांधवैः॥ मूर्खस्यहृदयंशून्यंसर्वशून्यंदरिद्रता॥ ५॥ नारिकेरफलाकारादृश्यंतेकेपिपुरुषा॥ अन्येबदरिकाकाराबाह्यतोवैमनोरमाः॥ ६॥ अस्यपुत्रानविद्वान्सानशूरानचपंडितः॥ शिव २२

अंधकारंकुऊंतस्यनष्टचंद्रणसर्वरी ॥ ७ ॥ सर्वरीहीपकश्चं
द्रः प्रभातेरविहीपकः ॥ एकेनापिसपुत्रेणसिंहोस्वपति
निर्भयः ॥ ८ ॥ सहैवदशभिः पुत्रेर्भारंवहतिपुगर्दभिः ॥ किं
जातैर्बहुभिपुत्रैर्शोकसंतापकारकैः ॥ ९ ॥ वरमेककुलाऽ
बीयत्राविश्वमतेकुलं ॥ १० ॥ यस्मिनुजीवतिजीवंतिबहुमि
त्राणिबांधवाः ॥ सफलंजीवततस्यआत्मार्थेकोनजीवति
॥ ११ ॥ पशवोपिहिजीवंतिकेवलंस्वोदरंभरा ॥ सर्वपुनर्भव
तिश्लाघ्याः यः परार्थेसजीवति ॥ १२ ॥ सजीवतिगुणाय
स्ययस्यधर्मसजीवति ॥ गुणधर्मविहीनस्यनिष्फलंत
स्यजीवतं ॥ १३ ॥ वाणीरसवतीयस्याभार्यापुत्रवतीसति ॥

चा॰ २३ लक्ष्मीस्त्यागाययस्योच्चैसफलंतस्यजीवितं॥१४॥दह्यमाना
सुतीव्रेणनीचापरमस्माग्निना॥असक्तास्तत्पदंगंतुततोनि
द्राप्रकुर्वते॥१५॥तुरंगैम्मजिताःगावाःकुलस्त्रीत्वपरक्रिया
गांधर्वेणजितावेदापुत्रोयोमात्रिणाजिता॥१६॥अग्निहो
त्रफलावेदादासीव्रतफलंश्रुतं॥रतिपुत्रफलानार्यः दत्तभु
क्तफलंधनं॥१७॥इतिवृद्धचा॰अष्टमोध्यायः॥८॥तर्कोजनं
यद्विजमुक्तशेषंप्रज्ञाचसायन्नकरोतिपापं॥तत्सौहृदं
यत्क्रियतेपुराक्षंदंभैर्विनायः क्रियतेसधर्मः॥१॥काले
नरिपुणासंधिःकालेमपिविपर्यय॥यः॥कार्यकारणमा
श्रित्यकालंक्षयतिपंडिताः॥२॥कालंसृजतिनाकालंच शिव २३

शुक्लपक्षेतुचंद्रमाः॥ अतिकालः संहतिप्रजाः कालः सुप्ते
षुजागर्तिकालोहिदुरतिक्रमः॥३॥ कालेदेवाविनस्यंतिका
लेवासुरपन्नगाः॥ नरेंद्रासर्वजीवाश्चकालेसर्वंविनस्यति
॥४॥ कालोग्रसतिभूतानिकालः कालतयंजगत्॥ ज्ञानयो
गसमाभ्यासेकालोरक्षतिसर्वदा॥५॥ व्याधितस्यार्थही
नस्यदेशांतरगतस्यच॥ नरस्यशोकनंतस्यसुहृद्दर्शनमौ
षधौ॥६॥ नित्यंस्नानासुगंधीचानित्यंचप्रियवादिनी॥ अ
ल्पाशीसत्यभाषाचदेवतासानुमानुषी॥७॥ सततंमानु
षगावोसततंधर्मवत्सला॥ सततंचदयायुक्तासततंर
तिगामिनी॥८॥ भर्तारंसततंभक्तासततंभक्तभोजना॥

चा०
२४

ई छायात कृतायां च सर्व सौभाग्यवर्द्धनं ॥ ९ ॥ या स्वकांतं परि
त्यज्य अन्यस्मिन्रमते विटं ॥ चिकित्सकस्यैव कृता स्वैरिणी सा
प्रकीर्तिता ॥ १० ॥ इति वृद्धचा० नवमोध्याय ॥ ९ ॥ वाजिवाहन
लोहानां काष्टपाषाणवाससां ॥ नारीपुरुषतोयानां अंतरं
बहु अंतरं ॥ १ ॥ गणेषु कृपतां यत्र निर्गुणैः किं प्रयोजनं ॥ वि
क्रियंते न घंटाभिः गावः क्षीरविवर्जिता ॥ २ ॥ पंडिताश्च गु
णान पश्यते मूर्खो देवाश्च केवलान् ॥ तस्माद्विमूर्ख सहस्रे
ण प्राप्तये कोन लभ्यते ॥ ३ ॥ प्राप्तयुक्तशरीरस्य किं करिष्य
ति शास्त्रवः ॥ कृत्रोपानहयुक्तस्य यथा वै कारधारया ॥ ४ ॥ शिव
अशक्यं नारभेत्प्राज्ञः अकार्यं नैव चिंतयेत् ॥ असत्यं नैव २४

वक्तृमंअलस्यंपरिवर्ज्जयेत ॥ ५ ॥ आलस्यंकृतकितेस्मिन्हंअ
न्नतंप्राणघातमं ॥ द्यूतमद्यपरस्त्रीचदूरतःपरिवर्जयेत ॥ ६ ॥
कुदेशंचकुमित्रंचकुसंबंधंकुसौहृदं ॥ अश्वसुभागजोभक्तो
गावःप्रथमसूतिका ॥ ७ ॥ अंतःपुरगतोराजावर्जनीयाश्च
दूरतः ॥ महामद्योःप्रतरणंमहापुरुषविग्रहं ॥ ८ ॥ महाजन
विरोधंचदूरतःपरिवर्ज्जयेत ॥ ९ ॥ स्थूलरोमावलीमर्द्दःकंमा
चबहुभाषिणी ॥ राजामित्रंकुमित्रंचदूरतःपरिवर्जयेत ॥ १० ॥
शकारातिपरित्राणंप्रीतिविभ्रमराजेरं ॥ केनरत्नमिदं
श्रेष्टमित्रामित्रहृपक्षरं ॥ ११ ॥ इतिवृद्धचा० दशमोध्याय १०
दुर्जयेदुष्टसंसर्गमारिष्टस्यचदर्शनं ॥ विवादंसहमित्रेश्च

चा० २५

दूरतः परिवर्ज्जयेत ॥१॥ अनाभ्यासे विषं शास्त्रं अजीर्णे विष
भोजनं ॥ विषं गोष्टी दरिद्रस्य वृद्धस्य तरुणी विषं ॥२॥ एककाल
समुत्पन्ना एकनक्षत्रजातकाः ॥ न भवंति समास्ते वैय
था बदरीकंठकाः ॥३॥ राजा कुलवधूर्विप्रा योगिन्य मंत्रिणस्
तथा ॥ स्थानभ्रष्टा न शोभंते दंता केशा नखा नराः ॥४॥ पुंगी
फलानि पत्राणि राजा हंस तुरंगमाः ॥ स्थानभ्रष्टा न शोभं
ते सिंहा सत्पुरुषा गजाः ॥५॥ पूर्वदत्ता च या विद्या पूर्वदत्तं च
यद्धनम् ॥ पूर्वदत्ता च या गावः अग्रे धावति धावति ॥६॥ ददा
ति प्रतिगृन्हाति गुह्यमाख्याति पृच्छति ॥ भुंक्ते भोजयते चैव
षड्विधं प्रीतिलक्षणं ॥७॥ इति वृद्धचा० एकादशोध्याय ॥११॥ शिव २५

राज्ञोग्निरिपुसर्पाणांदुष्टास्त्रीवृषभश्रृंगिणां॥ नदीनांचन
खीनांचविश्वासंनैवकारयेत॥१॥राजावैश्यपायुमोवह्निप्रा
घूणाबालयाचकः॥परदुःखंनजानातिअष्टमोग्रामकंट
कः॥२॥सुकुलेयोजयेत्कंमापुत्रंविद्यांतियोजयेत॥व्यस
नेयोजयेतशत्रुंमित्रंधर्मेनयोजयेत॥३॥विश्वासंकपि
लेशाद्वैद्वृक्षस्मनैवानुबालणे॥नद्वृक्षस्यसर्पविश्वासंस्त्रीच
रित्रेनविश्वसेत॥४॥यादिछेद्विपुलंप्रीतिंत्रीणितत्रनका
रयेत॥व्यवारव्यवहारंचपरोक्षेदारदर्शने॥५॥पापान्नि
वारयातियोजयेतहितायगुह्यंनिगूढातिगुणानप्रकटी
करोति॥आपद्गतंचनजहातिददातिकालेसन्मित्रलक्ष

एतमिदंप्रहांतिसंतः॥ ६॥ आदौतन्वीवृहन्मध्येविस्तारेणपदे
पदे॥ जायतेनानिवृत्तेनसतांमैत्रीसरित्समा॥ ७॥ सर्वातासे
समुत्पन्नेअर्द्धंत्यजतिपंडिताः॥ अर्द्धेनकुरुतेराज्यंसर्वनाशेण
हिमूर्खतः॥ ८॥ रैयस्यिधूंमनसौख्यंकस्यसंपद्यतेमहत॥ दे
वायत्तंजगत्सर्वंतस्मात्संतोषमाश्रयेत॥ ९॥ यथाधेनुसह
स्त्रेषुवत्सोविंदातिमातरं॥ यथापुराकृतंकर्मकर्तारमनुधा
वति॥ १०॥ इतिवृद्धचा० द्वादशोध्याय॥ १२॥ प्रतिजन्मपदभ्य
स्तंदानमध्ययनतपः॥ तेनैवाभ्यासयोगेनतथैवाभ्यासते
पुनः॥ १॥ वरंपूर्वतदुर्गेषुभ्रांतंवनचरैसह॥ नमूर्खजनसं
पर्कसुरेंद्रभुवनेष्वपि॥ २॥ धर्मःप्राणिदयासत्संक्षांतिश्च

वसाहिस्नुता ॥ ज्ञानवैराग्यसंपत्तिरधर्मस्यविपर्ययः ३ ध
र्मः श्रेयतुष्ठिंगानीशमः शांतिरघातततः ॥ तपोदानंचशीलं
चयोगोवैराग्यमेवच ॥ ४ ॥ सत्यंशौचंदयादानेपरद्रव्यंनगृह्य
ते ॥ ब्रह्मचर्यंतपोमूलंएतद्धर्मस्यलक्षणं ॥ ५ ॥ सर्वासुभनिदा
नंचकृतघ्नश्चविनाशयेत् ॥ शरीरस्यैवकृतेषुमूढापापानि
कुर्वते ॥ ६ ॥ नार्थंचिंतयेत्प्राज्ञोधर्ममेवाहिचिंतयेत् ॥ आहा
राहिमनुष्याणांजन्मनासहजायते ॥ ७ ॥ राज्यंसंपातिभोगं
चकुलेजन्मस्वरूपता ॥ पांडित्यमायुरारोग्यंधर्मस्यैवफ
लिवंविदुः ॥ ८ ॥ दारिद्र्यनाशनंदानंशीलंदुर्गतिनाशनं ॥
अज्ञाननाशनंविद्याभावभाभावनाशिनी ॥ ९ ॥ अनित्यानि

चा० शरीराणिविभवोनैवशाश्वत:॥नित्यंसंनिहितोमृत्यु:क
२७ र्तव्योधर्मसंग्रह:॥१०॥इतिवृद्धचा० त्रयोदशोध्याय॥१३॥
वस्त्रहीनंमलंकारं[redacted]सहीनंचव्यंजनं॥गांधर्वभावहीनंचवृद्ध
तहीनंचभोजनं॥१॥मातुलोयस्यगोविंदोपितायस्यधनंज
य:॥सएवनिधनोयात:कालोहिदुरतिक्रम:॥२॥होममं
त्रफलाविप्रानीतिशास्त्रफलंनृपा:॥रतिपत्रंफलंदारात्र
तशीतफलंधनं॥३॥उत्तमै:सहसंवास:पंडितै:सहसंकथा
सहस्वजनै:सहामित्रत्वंकुर्वाणोनावसीदति॥४॥उद्यमेन
तुवृत्तस्यमनुष्यस्यचधीमत:॥सदाधारयतस्येवनित्यंश्री
सहचारिणी॥५॥गांधर्वस्वरसंयुक्तंतांबूलभारतीकथा॥ शिव
२७

दृष्टमित्रं प्रियाबलस्पपूर्वाणिजगत्त्रये॥६॥ कांतावियोगं स्वज
नापमानं ऋणस्यशेषं कुजनस्यसेवा॥ दारिद्राभावाद्धिमु
खंचमित्रं विमाग्नितापुंचदहंतिकायं॥७॥ येषांनविद्यान
तपोनदानंनचापिशीलं नगुणोनधर्मः॥ तेमत्स्युलोकेभु
विभारभूतामनुष्यरूपेणमृगाश्चरंति॥८॥ वनेपिसिंहा
मृगमांससुपक्षिणः बिभुक्षितानैवतृणंचरंति॥ एवंकु
लानामसनानिभूतामनुष्यरूपेणमृगाश्चरंति॥९॥
यातेदुस्तरिवारिराशितरणेदीपांधकारागमे॥ निर्वाते
विजनप्रदेशधूकरणेदर्पोपशांतेरिपुः॥ इत्थंतत्तुविनास्ति
पत्रविधिनानोपार्यचिंताकृता ममैददुर्जनचित्तवृत्तिह
रणेधातापिहरणोद्यमः॥१०॥ इतिवृद्धचा० चतुर्दशोध्यायः॥१४


चा० कस्यदोषःकुलेनास्तिव्याधिनाकोनपीडितः॥ व्यसनंकेननन
२८ प्राप्तंकस्यसौख्यंनिरंतरं॥१॥ नराज्ञासहमित्रत्वंनसर्पोनवि
षर्वचित॥ नकुलंनिर्मलंकिंचितस्त्रीजनोयत्रजायते॥२॥ अ
नायकेनवास्तव्यंनस्थेयंबालनायके॥ स्त्रीनायकेनवास्त
व्यंनस्थेयंबालनायके॥३॥ अर्थातुराणांस्वजनोनबंधुःका
मातुराणांनभयंनलज्जया चिंतातुराणांनसुखंननिद्रा
क्षुधातुराणांनबलंनतेजः॥४॥ रिक्तपाणानपश्यामिराजा
नोदेवतागुरुं॥ नैमित्तिकंचानित्यंचफलंनफलमाप्नुयात॥५॥
प्रियवाक्यप्रदानेनसीसंतुष्यंतिजंतवः॥ तस्मात्प्रियंचव
क्तव्यंवचनेकिंदरिद्रता॥६॥ हेतुयुक्तस्यग्रंथस्यसत्यंसाधु शिव
जनप्रियं॥ योहिवक्तुंनजानातिसाजिह्वाकिंकरिष्यति॥७॥ २८

स्नानंरजकतीर्थेषु भोजनंपातितगृहे ॥ शयनंपूर्वयामेषु स
पातिनरकंध्रुवं ॥ ८ ॥ यस्यकस्यगृहेयानंभोजनंयस्यकस्य
चित ॥ अविमृश्यनकर्तव्यंपानभोजनमैथुनं ॥ ९ ॥ दुर्जनःप्रि
यवादीचनैवविश्वासकारणं ॥ मिष्टंवसतिजिह्वाग्रेहृदि
हालाहलंविषं ॥ १० ॥ इतिवृद्धचा० पंचदशोध्याय ॥ १५ ॥ दुर्ज
नःप्रियतुल्योपिवरंसर्पोनदुर्जनः ॥ सर्पोग्रसतिकालेनदु
र्जनस्तुपदेपदे ॥ १ ॥ संसारेकिंलवृक्षस्यद्वेफलेह्यमृतोपमा ॥
स्वभावविटरसास्वादेसंगतिःस्वजनेजने ॥ २ ॥ दुर्जनःपरि
हर्तव्योविद्ययाभूषितोपिसन् ॥ मणिनाभूषितःसर्पःकि
मसौनभयंकरः ॥ ३ ॥ संसारेसागरोसारोसारंगीतंचचंद्रमा ॥

चा० २९ चंदनं मालति साधुः बालकीलावलोकनं ॥ ४ ॥ हर्षे शोकभयं
दुःखं वित्तेषु राज्ञो भयं दुःखे भोगे रोगभयं जपे रिपुभयं काये
कृतांताद्भये ॥ विद्यावादभयं तपेंद्रियभयं रूपं भयं योषितां
एवं यस्य तु मध्ययं च सततं ज्ञानं परं निर्भयं ॥ ५ ॥ वीणावाणे
मन्मथश्चैकजाति काष्टं मूर्खः गर्दभःश्चैकजाति विप्रश्चं
दनश्चं पुकःश्चैकजाति अश्ववत्कुक्षत्रियश्चैकजाति ॥ ६ ॥
शयनं सुंदरी हीनं घृतहीनं च भोजनं ॥ पद्भिरागम्यते पंथा
पातकं किमतः परं ॥ ७ ॥ संपति यस्य न हर्षो विपदि विषा
दो रणे च ॥ धीरत्वं तं भुवनत्रययाति लकं जनयंति जननी सु
तं विरलं ॥ ८ ॥ उच्चैरुच्चिरतमं यतृ किंचिदजानतापि पुर शिव २९

षेण ॥ मूर्खबहुमन्यंते विदुषामपि संशयो भवति ॥ ९ ॥ इति वृ
द्धचाणक्ये राजनीतिशास्त्रे षोडशोध्याय ॥ १६ ॥ छ छ छ

संमत् १८९८ मीति ज्येष्ठ वद्य पंचमी तन्दीने पुस्तक समाप्तं ॥
हस्ताक्षर विष्णुराम मीशर ज्ञाति बढनगरे ब्राह्मण ॥ शुभं



३०

[OrderDescription]
,CREATED=11.10.19 13:57
,TRANSFERRED=2019/10/11 at 14:03:42
,PAGES=63
,TYPE=STD
,NAME=S0002026
,Book Name=487
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF

FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,